শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৰেঙ্কটনাথার্যঃ কৰিতার্কিককেসরী।
ৰেদান্তাচার্যৰর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রী-ৰেগাসেতুস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রী-ৰেগাসেতুস্তোত্রম্ ॥

শ্রীমান্ ৰেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৰেদান্তাচার্যৰর্যো মে সন্নিধত্তাং সদা হৃদি॥

একং ৰেগৰতী মধ্যে হস্তিশৈলে চ দৃশ্যতে।
উপায ফল ভাৱেন স্বযং ৱ্যক্তং পরং মহঃ॥ ১ ॥

ঈষ্টে গমযিতুং পারমেষ সেতুরভঙ্গুরঃ।
যত্র সারস্বতং স্রোতো ৱিশ্রাম্যতি ৱিশৃঙ্খলম্॥ ২ ॥

জযতি জগদেকসেতুঃ
ৰেগৰতী মধ্য লক্ষিতো দেৱঃ।
প্রশমযতি যঃ প্রজানাং
প্রথিতান্ সংসার জলধি কল্লোলান্॥ ৩ ॥

ৱিভাতু মে চেতসি ৱিষ্ণু সেতুঃ
ৰেগাপগা ৰেগ ৱিঘাত হেতুঃ।
অম্ভোজযোনেঃ যদুপজ্ঞম্ আসীত্
অভঙ্গ রক্ষা হযমেধ দীক্ষা॥ ৪ ॥

চতুরানন সপ্ততন্তু গোপ্তা
সরিতং ৰেগৰতীমসৌ নিরুন্ধন্।
পরিপুষ্যতি মঙ্গলানি পুংসাং
ভগৱান্ ভক্তিমতাং যথোক্তকারী॥ ৫ ॥

শ্রীমান্ পিতামহৱধূ পরিচর্যমাণঃ
শেতে ভুজঙ্গ শযনে স মহা ভুজঙ্গঃ।
প্রত্যাদিশন্তি ভৱ সঞ্চরণং প্রজানাং
ভক্তানুগন্তিরিহ যস্য গতাগতানি॥ ৬ ॥

প্রশমিত হযমেধ ৱ্যাপদং পদ্মযোনেঃ
শ্রিতজন পরতন্ত্রং শেষভোগে শযানম্।

শরণমুপগতাঃ স্মঃ শান্ত নিঃশেষ দোষং
শতমখ মণি সেতুং শাশ্বতং ৰেগৱত্যাঃ॥ ৭॥

শরণমুপগতানাং সোযমাদেশ কারী
শমযতি পরিতাপং সংমুখঃ সর্ৱ জন্তোঃ।
শতগুণ পরিণামঃ সন্নিধৌ যস্য নিত্যং
ৱর ৱিতরণ ভূমা ৱারণাদ্রীশ্বরস্য॥ ৮॥

কাঞ্চীভাগ্যং কমল নিলযা চেতসোভীষ্ট সিদ্ধিঃ
কল্যাণানাং নিধিরৱিকলঃ কোপি কারুণ্য রাশিঃ।
পুণ্যানাং নঃ পরিণতিরসৌ ভূষযন্ ভোগিশয্যাং
ৰেগাসেতুর্জযতি ৱিপুলো ৱিশ্ব রক্ষৈককহেতুঃ॥ ৯॥

ৰেগাসেতোরিদং স্তোত্রং ৰেঙ্কটেশেন নির্মিতম্।
যে পঠন্তি জনাস্তেষাং যথোক্তং কুরুতে হরিঃ॥ ১০॥

॥ ইতি শ্ৰী-ৰেগাসেতুস্তোত্ৰম্ সমাপ্তম্॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্ৰীমতে ৰেঙ্কটেশায ৰেদান্তগুরৱে নমঃ॥